**CLASS : 12th (Sr. Secondary)** **Code No. 205**

**Series : SS-April/2021**

*रोल नं०* | | | | | | | | | | |

# संस्कृत

## भाग – I

## (आत्मनिष्ठ प्रश्न)

*(Academic)*

(Only for Fresh/School Candidates)

*समय : $2\frac{1}{2}$ घण्टे]* *[ पूर्णांक : 80* (भाग–I : 40, भाग–II : 40)

प्रश्न-पत्र दो भागों में विभाजित है : भाग–I (आत्मनिष्ठ) एवं भाग–II (वस्तुनिष्ठ)। परीक्षार्थी को दोनों भागों के प्रश्नों के उत्तर को अपनी उत्तर पुस्तिका में लिखना है। प्रश्न-पत्र का भाग–I परीक्षा आरम्भ होने पर पहले उत्तर-पुस्तिका के साथ दिया जाएगा तथा भाग–II के लिए आखिरी का एक घंटे का समय दिया जाएगा अर्थात् परीक्षा समाप्त होने से एक घंटा पूर्व परीक्षार्थी को भाग–II का प्रश्न-पत्र दिया जाएगा।

भाग–I के प्रश्न-पत्र में कुल 9 प्रश्न एवं भाग–II के प्रश्न-पत्र में कुल 37 प्रश्न हैं।

- *कृपया जाँच कर लें कि **भाग–I** के इस प्रश्न-पत्र में मुद्रित पृष्ठ **4** तथा प्रश्न **9** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/ पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्योलेखोऽपेक्ष्यते।*



Downloaded from cclchapter.com

## खण्डः 'क'

### (अपठितम् अवबोधनम्)

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

बाल्यकाले विशेषतो बालकस्योपरि संसर्गस्य प्रभावो भवति। बालको यादृशैः बालकैः सह संगतिं करिष्यति तादृशः एव भविष्यति। अतः बाल्यकाले दुर्जनैः सह संगतिः कदापि न करणीया। दुर्जनानां संसर्गेण बहवः हानयः भवन्ति। यथा दुर्जनसंसर्गेण मनुष्यः असद्वृत्तः दुर्विचारयुक्तः च भवति तस्य बुद्धिः दूषिता भवति। सः दुर्व्यसनग्रस्तो भवति। अतः तस्य शरीरं क्षीणं दुर्बलं च भवति। कीर्तिः नश्यति। अतः स्वयशोवृद्धये ज्ञानवृद्धये सुखस्य शान्तेश्च प्राप्तये सर्वैरपि सदा सत्संगतिः करणीया दुर्जनसंगतिश्च हेया।

*प्रश्नाः–*

(क) बाल्यकाले बालकस्योपरि कस्य प्रभावो भवति ? $5 \times 2 = 10$

(ख) कैः सह संगतिः कदापि न करणीया ?

(ग) दुर्जनसंसर्गेण मानवस्य बुद्धिः कीदृशी भवति ?

(घ) कदा दुर्जनैः सह संगतिः कदापि न करणीया ?

(ङ) दुर्जनसंसर्गेण का नश्यति ?

## खण्डः 'ख'

### (रचनात्मकं कार्यम्)

**2.** *विषयमेकमधिकृत्य* लघुनिबन्धं संस्कृतभाषया रचयत - $1 \times 3 = 3$

(क) प्रातःकालीनभ्रमणम्

(ख) संस्कृतभाषायाः महत्त्वम्

(ग) मम प्रियं पुस्तकम्



Downloaded from cclchapter.com

## खण्डः 'ग'

## (पठितम् अवबोधनम्)

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थः कार्यः – 1 × 5 = 5

(क) राजवचनमनुगच्छति जनो भयात्। उपदिश्यमानमपि ते न शृण्वन्ति। अवधीयन्तः खेदयन्ति हितोपदेशदायिनो गुरून्।

**अथवा**

(ख) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। नाशयति च पुरुषमत्यासङ्गो विषयेषु।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थः कार्यः – 1 × 5 = 5

(क) ईशा वास्यमिदं सर्वं यत्किञ्चित् जगत्यां जगत्।

तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्।।

**अथवा**

(ख) तमध्वरे विश्वजिति क्षितीशं

निःशेषविश्राणितकोषजातम्।

उपात्तविद्यो गुरुदक्षिणार्थी

कौत्सः प्रपेदे वरतन्तुशिष्यः।।

**5.** अधोलिखितासु सूक्तिषु ***एकस्याः*** सूक्त्याः भावार्थं हिन्दीभाषया लिखत – 1 × 3 = 3

(क) दातव्यं भोक्तव्यं धनविषये संचयो न कर्त्तव्यः।

(ख) एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।

(ग) जगाद भूयो जगदेकनाथः।



Downloaded from cclchapter.com

## खण्डः 'घ'

### (संस्कृतसाहित्यपरिचयः)

**6.** कालिदासस्य ***अथवा*** पं० हृषीकेशस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 1 × 5 = 5

**7.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** पुस्तकस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः - 1 × 5 = 5

(क) गीता

(ख) रघुवंशम्

## खण्डः 'ङ'

### (छन्दोऽलंकारयोः परिचयः)

**8.** अधोलिखितेषु छन्दस्सु ***एकस्य*** छन्दसः संस्कृतभाषया लक्षणं लिखत – 1 × 2 = 2

(i) इन्द्रवज्रा

(ii) उपेन्द्रवज्रा

(iii) वंशस्थम्

**9.** अधः प्रदत्तेषु अलंकारेषु ***एकस्य*** अलंकारस्य लक्षणं संस्कृतभाषया लिखत - 1 × 2 = 2

(i) यमकालंकारः

(ii) उपमालंकारः

(iii) व्याजस्तुतिः



Downloaded from cclchapter.com

**CLASS : 12th** (Sr. Secondary) **Code No. 205**

**Series : SS-April/2021**

*रोल नं०* | | | | | | | | | | |

# संस्कृत

## भाग – II

## (वस्तुनिष्ठ प्रश्न)

*(Academic)*

(Only for Fresh/School Candidates)

- *कृपया जाँच कर लें कि **भाग-II** के इस प्रश्न-पत्र में मुद्रित पृष्ठ **7** तथा प्रश्न **37** हैं।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्योलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**1.** अधोलिखितं गद्यांशं पठित्वा अधस्तानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि -

राजानः न मानयन्ति मान्यान्। जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धोपदेशम्। कुप्यन्ति हितवादिने।

*प्रश्नाः* – $2 \times 1 = 2$

(क) राजानः कस्मै कुप्यन्ति ?

(ख) के मान्यान् न मानयन्ति ?

**2.** अधोलिखितं श्लोकं पठित्वा अधस्तनयोः प्रश्नयोः उत्तरे देये –

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि।।



Downloaded from cclchapter.com

*प्रश्नाः–* 2 × 1 = 2

(क) जनकादयः केनैव संसिद्धिम् आस्थिताः ?

(ख) किं संपश्यन् त्वं कर्म कर्तुम् अर्हसि ?

**3.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 2 × 1 = 2

(क) विद्यया <u>अमृतम्</u> अश्नुते।

(ख) <u>तेन</u> त्यक्तेन भुञ्जीथाः।

**खण्डः 'ख'**

**(बहुविकल्पीयाः प्रश्नाः)**

*अधस्तनप्रश्नानां लिखितोत्तरविकल्पेषु शुद्धविकल्पं चित्वा उत्तरपुस्तिकायां लिखत –* 1 × 34 = 34

**4.** 'तपोधनः' इति पदे कः समासः ?

(क) द्वन्द्वः (ख) द्विगुः

(ग) तत्पुरुषः (घ) बहुव्रीहिः

**5.** 'महान् ऋषिः' इति पदे किं समस्तपदम् ?

(क) महार्षिः (ख) माहर्षिः

(ग) महर्षिः (घ) महाऋषिः

**6.** 'तथापि' इति पदे कः सन्धिः ?

(क) दीर्घसन्धिः (ख) गुणसन्धिः

(ग) वृद्धिसन्धिः (घ) यण्सन्धिः

**7.** 'न + उपसर्पति' इति पदे किं सन्धिपदम् ?

(क) नोपसर्पति (ख) नेपसर्पति

(ग) नुपसर्पति (घ) नौपसर्पति



Downloaded from cclchapter.com

**8.** 'नैव' इति पदे कः सन्धिविच्छेदः ?

(क) नै + व (ख) न + एव

(ग) ना + व (घ) नै + एव

**9.** 'विद्वान्' इति पदस्य विलोमपदमस्ति –

(क) मूर्खः (ख) चञ्चलः

(ग) पुरुषः (घ) महिला

**10.** 'जलम्' इति पदस्य पर्यायपदं लिखत।

(क) सरिता (ख) सरवरः

(ग) सलिलम् (घ) तड़ागः

**11.** 'राज्ञः पुरुषः' इति विग्रहे किं समस्तम् ?

(क) राजासमीपम् (ख) राजपुरुषः

(ग) राज्ञासमीपम् (घ) राज्ञसमीपम्

**12.** 'विना' इति उपपदयोगे का विभक्तिः ?

(क) प्रथमा (ख) द्वितीया

(ग) षष्ठी (घ) चतुर्थी

**13.** 'आ + गम् + ल्यप्' एतेषां संयोगे किं रूपम् ?

(क) आगत्य (ख) आगमय

(ग) आगत्वा (घ) अगच्छत्

**14.** 'अब्रवीत्' अत्र कः लकारः ?

(क) लट् (ख) लोट्

(ग) लृट् (घ) लङ्



Downloaded from cclchapter.com

**15.** 'पृच्छति' पदे कः लकारः ?

(क) लट्  (ख) लोट्

(ग) विधिलिङ्  (घ) लेट्

**16.** 'तस्य' अत्र का विभक्तिः ?

(क) चतुर्थी  (ख) पञ्चमी

(ग) षष्ठी  (घ) सप्तमी

**17.** 'अस्मद्' प्रथमाविभक्तौ बहुवचने किं रूपम् ?

(क) अहं  (ख) आवाम्

(ग) वयम्  (घ) अस्मान्

**18.** 'अनवाप्य' इति पदे विग्रहोऽस्ति ?

(क) ना वाप्य  (ख) ना अनवाप्य

(ग) न अवाप्य  (घ) अवाप्य

**19.** 'तेनैव' इति पदे कः सन्धिः ?

(क) दीर्घसन्धिः  (ख) गुणसन्धिः

(ग) वृद्धिसन्धिः  (घ) यण्सन्धिः

**20.** 'यत् + च' इति पदे किं सन्धिपदम् ?

(क) यच्च  (ख) यद्च

(ग) यत्च  (घ) यच

**21.** 'समुद्रोऽपि' इति पदे कः सन्धिविच्छेदः ?

(क) समुद्रे + अपि  (ख) समुद्रो + अपि

(ग) समुद्र + अपि  (घ) समुद्रः + अपि



Downloaded from cclchapter.com

**22.** 'अश्नुते' अत्र पदे कः धातुः ?

(क) अश्
(ख) अश्न्
(ग) अश्न
(घ) अन्

**23.** 'लभते' अत्र कः पुरुषः ?

(क) उत्तमपुरुषः
(ख) प्रथमपुरुषः
(ग) मध्यमपुरुषः
(घ) चतुर्थः पुरुषः

**24.** 'तृप्तम्' इति पदे कः प्रत्ययः ?

(क) तव्यत्
(ख) अनीयर्
(ग) क्त्वा
(घ) क्त

**25.** ''तस्याः मुखं चन्द्र एव'' कोऽलंकारो भवति ?

(क) श्लेषः
(ख) रूपकम्
(ग) व्याजस्तुतिः
(घ) अनुप्रासः

**26.** 'साकम्' इति उपपदयोगे का विभक्तिः ?

(क) द्वितीया
(ख) चतुर्थी
(ग) तृतीया
(घ) पञ्चमी

**27.** 'लब्ध्वा' इति पदे कः प्रत्ययः ?

(क) क्त
(ख) क्त्वा
(ग) यत्
(घ) ण्यत्

**28.** 'तमसा' इति पदस्य विलोमपदमस्ति ?

(क) मध्यः
(ख) भयः
(ग) अङ्गः
(घ) प्रकाशेन



Downloaded from cclchapter.com

**29.** 'दिवसेषु' इति पदस्य विशेषणपदं किम् ?

(क) समतिक्रामत्सु (ख) महान्

(ग) दिवसेण (घ) मूर्खः

**30.** 'दीर्घः' इति पदस्य विशेष्यपदं किम् ?

(क) पत्रम् (ख) अवकाशः

(ग) रात्रिः (घ) जीवनम्

**31.** अष्ट (12) वर्णाः कस्मिन् छन्दसि भवन्ति ?

(क) वंशस्थछन्दसि (ख) मन्दाक्रान्ताछन्दसि

(ग) इन्द्रवज्राछन्दसि (घ) अनुष्टुप् छन्दसि

**32.** 'साधुभिः' इति पदे का विभक्तिः ?

(क) तृतीया (ख) चतुर्थी

(ग) पञ्चमी (घ) षष्ठी

**33.** 'प्रकृतिसिद्धम्' इति पदे विग्रहोऽस्ति ?

(क) प्रकृतेः सिद्धम् (ख) प्रकृत्या सिद्धम्

(ग) प्रकृतिः सिद्धम् (घ) प्रकृतिः सिद्धः

**34.** 'न + आर्या' इति विग्रहे किं समस्तपदम् ?

(क) नार्या (ख) अनार्या

(ग) नार्यः (घ) नारीयः

**35.** 'सुकृतम्' इति पदस्य विलोमपदं लिखत।

(क) दुष्कृतम् (ख) दुरितम्

(ग) पुराणम् (घ) हस्ती



Downloaded from cclchapter.com

**36.** 'परितः' इति उपपदयोगे का विभक्तिः ?

(क) पञ्चमी

(ख) षष्ठी

(ग) द्वितीया

(घ) सप्तमी

**37.** 'दत्त्वा' इति पदे कः प्रत्ययः ?

(क) क्त्वा

(ख) तव्यत्

(ग) अण्

(घ) दथ्



Downloaded from cclchapter.com